साङ्ख्यकारिका: 1-50

ईश्वरकृष्णः

Dr. P. Srinivasa Krishna Reddy

01

दुःखत्रयाऽभिघातात् जिज्ञासा तदपघातके हेतौ। दृष्टे साऽपार्था चेत् नैकान्तात्यन्ततोऽभावात्।।

जिज्ञासा	अपार्था (अर्थरहिता) (व्यर्था)
कस्मिन् - हेतौ	का अपार्था – जिज्ञासा
कीदृशे हेतौ – तदपघातके हेतौ	कस्मिन् सति जिज्ञासा अपार्था – दृष्टे
अत्र तद् पदबोधकं किम् – दुःखत्रयम्	**दृष्टं नाम किम्**
दुःखत्रयं नाम किम्	दृष्टे सति जिज्ञासा अपार्था किम् - न
कस्मात् दुःखत्रयम् अपघातव्यम् – मनुष्यस्य अभिघातत्वात्	कस्मात् जिज्ञासा न अपार्था – अभावात्
	कस्य अभावः न भवति – दुःखत्रयस्य
	कथं दुःखत्रयस्य अभावः न भवति - एकान्तात्यन्तः

01

दु:खत्रयम् The Three Pains



01

आध्यात्मिकदुःखम्

शारीरकम्	मानसिकम्

01

आधिभौतिकदुःखम्



01

आधिदैविकदुःखम्

01

दृष्टोपायाः तात्कालिकाः

आहारेण बुभुक्षा शाम्यति।	किन्तु पुनः बुक्षुक्षा भवति।
औषधस्वीकरणेन रोगः प्रशाम्यति।	अपरो रोगः प्रवर्धते।
शीतकाले सूर्यतापात् विमुक्तिः भवति।	पुनः ग्रीष्मकाले सूर्यातपः प्रचण्डः भवति।
राज्यप्राप्त्या दुर्योधनस्य सन्तोषः अभवत्।	पाण्डवानां राजसूययागेन दुर्योधनस्य असूया प्रवर्धिता।
वित्तसम्पादनेन आनन्दः भवति।	वित्तव्ययेन दुःखं भवति।

02

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः। तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्।।

आनुश्रविकः उपायः दृष्टवत् = आनुश्रविके सत्यपि दुःखत्रयस्य अत्यन्ताभावः न भवति।
कस्मात्? - सः (आनुश्रविकः उपायः) अविशुद्धियुक्तः। क्षययुक्तः। अतिशययुक्तः।
कथम् आनुश्रविकः अविशुद्धिक्षयातिशययुक्तः?
तद्विपरीतः = विशुद्धियुक्तः। अक्षययुक्तः। अनतिशययुक्तः।
तद्विपरीतः कः? तद्विपरीतः श्रेयान्। (दुःखत्रयस्य अत्यन्ताभावः)
श्रेयान् कस्मात् भवति? विज्ञानात् भवति।
केषां विज्ञानात् श्रेयान् भवति? व्यक्ताव्यक्तज्ञविज्ञानात् श्रेयान् भवति।

02

आनुश्रविकः कथम् अविशुद्धिक्षयातिशययुक्तः?

1 अविशुद्धियुक्तः	सर्वान् लोकान् जयति, मृत्युं तरति, पाप्मानं तरति, ब्रह्महत्यां तरति, योऽश्वमेधेन यजते। (अत्र अश्वमेधे पशुमारणात् अविशुद्धिः।)
2 क्षययुक्तः	क्षीणे पुण्ये मर्त्यलोकं विशन्ति। बहूनीन्द्रसहस्राणि देवानां च युगे युगे। कालेन समतीतानि कालो हि दुरतिक्रमः।। (अत्र देवतानाम् इन्द्रस्यापि क्षयः संसूच्यते।)
3 अतिशययुक्तः	ज्योतिष्टोमेन स्वर्गकामो यजेत। वाजपेयेन स्वाराज्यमिन्द्रपदं च कामयमानः। (अत्र ज्योतिष्टोमापेक्षया इन्द्रपदस्यातिशयः। पुनश्च इन्द्रपदमपि उपर्युक्तरीत्या क्षीयते।)

दुःखतरणोपायाः
Means of Liberation from pains

	उपायः		फलम्
1	दृष्टम् Well known	लौकिकोपायाः Common means	तात्कालिकम् Temporary
2	आनुश्रविकम् Heard	अलौकिकोपायाः Uncommon means	अशाश्वतम् Not eternal
3	व्यक्ताव्यक्तज्ञविज्ञानम् Knowledge of Vyakta - Avyakta - Jña	ज्ञानोपायः Means of Knowledge	श्रेयान् Eternal

03

मूलप्रकृतिरविकृतिः महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।।

व्यक्तम्		अव्यक्तम्	ज्ञः
प्रकृतिविकृतयः	विकाराः	अविकृतिः	न प्रकृतिः न विकृतिः
सप्त (7)	षोडशकः (16)	एका (1)	बहुत्वम् ()
महदाद्याः	11 इन्द्रियाणि 5 भूताः	मूलप्रकृतिः	पुरुषः

1 प्रकृतिः नाम किम्?
2 विकृतिः नाम किम्?
3 प्रकृतिविकृतिः नाम किम्?

03

प्रकृतिः	विकृतिः

03

प्रकृतिः	प्रकृतिविकृतिः	विकृतिः

प्रकृतिः = कारणम्

विकृतिः = कार्यम्

04

दृष्टमनुमानमाप्तवचनञ्च सर्वप्रमाणसिद्धत्वात्। त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि।।

प्रमेयम् = 1 व्यक्तम् 2 अव्यक्तम् 3 ज्ञः
कथं प्रमेयसिद्धिः भवति? --- प्रमेयसिद्धिः प्रमाणात् हि भवति।
प्रमाणं नाम किम्?
इष्टं प्रमाणं कतिविधम्? --- इष्टं प्रमाणं त्रिविधम्।
कानि तानि त्रिविधप्रमाणानि? 1 दृष्टम् 2 अनुमानम् 3 आप्तवचनं च।
प्रमाणान्तरेषु सत्स्वपि किमर्थं त्रिविधं प्रमाणम् एव इष्टम्? सर्वप्रमाणसिद्धत्वात्।

05

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिङ्गलिङ्गिपूर्वकम् आप्तश्रुतिराप्तवचनं तु।।

प्रतिविषयाध्यवसायः दृष्टं नामकं प्रमाणम्।
अनुमानं नामकं प्रमाणम् त्रिविधम्। 1 पूर्ववत् 2 शेषवत् 3 सामान्यतो दृष्टम्।
तदेव प्रमाणं पुनः द्विविधम्। 1 लिङ्गपूर्वकम् 2 लिङ्गिपूर्वकम्
आप्तश्रुतिः एव आप्तवचनं नामकं प्रमाणम्।

05

Two stages of perception

निर्विकल्पकम्
Indeterminate

सविकल्पकम्
Determinate

Flower

अग्निमुखी
Flame lily (Gloriosa Superba)
Poisonous creeper
Can be developed from rhizomes & seeds
National Flower of Zimbabwe
Cultivated in US and Australia etc.

05

Which boy a Monkey may rob? Why?

05

पूर्ववत्

शेषवत्

सामान्यतो दृष्टम्

लिङ्गलिङ्गिपूर्वकम्

- 1 प्रतिज्ञा Statement
  पर्वतो वह्निमान्।
- 2 हेतुः Reason
  धूमत्वात्।
- 3 उदाहरणम् Example
  यो यो धूमवान् स स वह्निमान्।
  यथा महानसः।
- 4 उपनयः Correlation
  तथा च अयम् पर्वतः।
  5 निगमनम् Conclusion
- तस्मात् पर्वतो वह्निमान्।

05

आप्ता:

06

सामान्यतस्तु दृष्टाद् अतीन्द्रियाणां प्रतीतिरनुमानात्।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्।।

दृष्टात्	सामान्यतः प्रतीतिः।
अनुमानात्	अतीन्द्रियाणां प्रतीतिः।
आप्तागमात्	तस्मादपि (अनुमानादपि) असिद्धम्, परोक्षं च सिद्धं भवति।

07

अतिदूरात् सामीप्याद् इन्द्रियघातात् मनोऽनवस्थात्।
सौक्ष्म्याद् व्यवधानाद् अभिभवात् समानाभिहाराच्च।।

1	हैदराबाद् नगरे स्थित्वा तिरुमलगिरौ वेङ्कटेश्वरं द्रष्टुं न शक्यते।
2	अस्माकं नेत्रं साक्षाद् द्रष्टुं वयं न शक्नुमः।
3	श्रवणरोगी सम्यक् श्रोतुं न शक्नोति।
4	मनसः अनवस्थात् सम्यक् द्रष्टुं न शक्यते।
5	सूक्ष्मजीवी न दृश्यते।
6	भित्तेः पश्चात् कः अस्तीति न ज्ञायते।
7	सूर्यतेजसि नक्षत्राणां दर्शनं न भवति।
8	पूर्वदृष्टः व्रीहिकणः व्रीहीणां राशौ अभिज्ञातुं न शक्यते।

08

सौक्ष्म्यात् तदनुपलब्धिः नाभावात् कार्यतस्तदुपलब्धेः।
महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं च।।

तदनुपलब्धिः इत्यत्र कस्या अनुपलब्धिः? --- मूलप्रकृतेः।
मुलप्रकृतिः अभावात् अनुपलब्धा वा? --- न अभावात्।
तर्हि कस्मात् मूलप्रकृतिः अनुपलब्धा? --- सौक्ष्म्यात्।
तर्हि कथं तस्य उपलब्धिः (अस्तित्वम्) ज्ञायते? --- कार्यतः
मूलप्रकृतेः कार्यं किम्? --- महदादि।
महदादि कीदृशम्? --- महदादि प्रकृतिविरूपं, प्रकृतिसरूपं च।

09

असदकरणाद् उपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम्।।

सत् कार्यम्। (कार्यं कारणे अस्ति।) कथम्? इत्थम् -
1 असत् अकरणं भवति। यदि कारणे कार्यस्य अस्तित्वं नास्ति, तत्कारणात् तत्कार्यं न जायते।
2 कार्यस्य उत्पादने कारणम् उपादानं भवति।
3 सर्वेभ्यः कारणेभ्यः कार्यं न सम्भवति। 3 एकस्मात् कारणात् सर्वाणि कार्याणि न सम्भवन्ति।
4 शक्तं कारणम् एव शक्यं कार्यम् उत्पादयति।
5 कारणे यल्लक्षणानि भवन्ति तान्येव लक्षणानि कार्ये भवन्ति।
तस्मात् सत् कार्यम्।

09

शक्तम् कारणम्	शक्यम् कार्यम्

मूलप्रकृतिः → महदादि

10

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।।

व्यक्तम्		अव्यक्तम्
हेतुमत्	1	अहेतुमत्
अनित्यम्	2	नित्यम्
अव्यापि	3	व्यापि
सक्रियम्	4	निष्क्रियम्
अनेकम्	5	एकम्

व्यक्तम्		अव्यक्तम्
आश्रितम्	6	अनाश्रितम्
लिङ्गम्	7	अलिङ्गम्
सावयवम्	8	निरवयवम्
परतन्त्रम्	9	स्वतन्त्रम्

10

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।।

व्यक्तम्		अव्यक्तम्
हेतुमत्	1	अहेतुमत्
अनित्यम्	2	नित्यम्
अव्यापि	3	व्यापि
सक्रियम्	4	निष्क्रियम्
अनेकम्	5	एकम्

व्यक्तम्		अव्यक्तम्
आश्रितम्	6	अनाश्रितम्
लिङ्गम्	7	अलिङ्गम्
सावयवम्	8	निरवयवम्
परतन्त्रम्	9	स्वतन्त्रम्

व्यक्त-अव्यक्तयोः मध्ये भेदाः।

10

व्यक्तम्		
हेतुमत्	1	कारणात् जायते
अनित्यम्	2	नश्यति
अव्यापि	3	सर्वस्मिन् मृदि घटो न भवति।
सक्रियम्	4	बुद्ध्यादीनि देहत्यागं देहान्तरग्रहणं कुर्वन्ति।
अनेकम्	5	प्रतिपुरुषे भिन्नानि बुद्ध्यादीनि।

व्यक्तम्		
आश्रितम्	6	स्वकारणे आश्रितम्।
लिङ्गम्	7	स्वकारणं ज्ञापयति।
सावयवम्	8	संयोगे भवति।
परतन्त्रम्	9	परेषाम् अधीने वर्तन्ते।

11

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्।।

व्यक्तम् & अव्यक्तम्		पुरुषः
त्रिगुणम्	1	अत्रिगुणः
अविवेकि	2	विवेकी
विषयः	3	अविषयः
सामान्यम्	4	असामान्यः
अचेतनम्	5	चेतनः
प्रसवधर्मि	6	अप्रसवधर्मी

व्यक्त-अव्यक्तयोः समानलक्षणानि, तद्भिन्नानि पुरुषलक्षणानि

11

व्यक्तम् & अव्यक्तम्		
त्रिगुणम्	1	सत्त्व-रजस्-तमोगुणयुक्तम्। (सुख-दुःख-मोहादियुक्तम्।)
अविवेकि	2	अभिन्नम्। (अव्यक्तात् व्यक्तम् अभिन्नः)
विषयः	3	भोग्यम्।
सामान्यम्	4	सर्वपुरुषसाधारणम्।
अचेतनम्	5	जडम्।
प्रसवधर्मि	6	उत्पत्तिधर्मि (उत्पादयति, उत्पद्यते च।)

12

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः। अन्योन्याभिभवाश्रय-जननमिथुनवृत्तयः।।

	सत्त्वगुणः	रजोगुणः	तमोगुणः
1	प्रीत्यात्मकः Pleasure	अप्रीत्यात्मकः Pain	विषादात्मकः Delusion
2	प्रकाशार्थः Illumination	प्रवृत्त्यर्थः Endeavour	नियमार्थः Lethargy Obstruction
3	लघुः Light	चलः Active	गुरुः, Heaviness वरणकः Covering
4	अन्योन्याभिभववृत्तयः – Mutually dominating		
5	अन्योन्याश्रयवृत्तयः – Mutually supporting		
6	अन्योन्यजननवृत्तयः – Mutually productive		
7	अन्योन्यमिथुनवृत्तयः – Mutually Cooperative		

13

सत्त्वं लघु प्रकाशकमिष्टम् उपष्टम्बकं चलं च रजः।
गुरुवरणकमेव तमः प्रदीवच्चार्थतो वृत्तिः।।

Light – Wick - Oil

14

अविवेक्यादेः सिद्धिः त्रैगुण्यात् तद्विपर्ययेऽभावात्।
कारणगुणात्मकत्वात् कार्यस्य अव्यक्तमपि सिद्धम्।।

1	अविवेकित्वादि-धर्माः (11 श्लोकोक्ताः) पृथिव्यादिषु (व्यक्तेषु) गोचराः एव। (अङ्गीकुर्मः।)
1	किन्तु अप्रत्यक्षे अव्यक्ते ते च धर्माः सन्ति इति कथं वक्तुं शक्यते? (सन्देहः।)
2	त्रैगुण्यात् (त्रिगुणानां भावात्) इति सन्देहनिवारणम्।
3	व्यक्त-अव्यक्तानां विपर्यये (पुरुषे) त्रिगुणाः अभावाः किल।
4	पुनश्च पृथिव्यादि अव्यक्तानां जनकत्वात् पृथिव्यादिकार्यगतधर्माः कारणे अपि भवन्ति इत्यस्मात् हेतोः अव्यक्तम् सिद्धम्। (कार्यधर्माः कारणात् एव भवन्ति।)

15, 16

भेदानां परिणामात् समन्वयात्
शक्तितः प्रवृत्तेश्च।
कारणकार्यविभागाद्
अविभागाद् वैश्वरूपस्य।।

अव्यक्तसाधकाः पञ्चहेतवः	
1	भेदानां परिणामात्
2	समन्वयात्
3	शक्तितः प्रवृत्तेः
4	कार्यकारणविभागाद्
5	वैश्वरूपाद् अविभागस्य

कारणमस्त्यव्यक्तं
प्रवर्तते त्रिगुणतः समुदयाच्च।
परिणामतः सलिलवत्
प्रतिप्रतिगुणाश्रयविशेषात्।।

अव्यक्तं प्रवर्तते	
1	त्रिगुणतः समुदयात्
2	सलिलवत् परिणामतः
3	प्रतिप्रतिगुणाश्रयविशेषात्

15

भेदानां परिणामात् समन्वयात् शक्तितः प्रवृत्तेश्च। कारणकार्यविभागाद् अविभागाद् वैश्वरूपस्य।।

15

भेदानां परिणामात् समन्वयात् शक्तितः प्रवृत्तेश्च।
कारणकार्यविभागाद् अविभागाद् वैश्वरूपस्य।।

अव्यक्तसाधकाः पञ्चहेतवः		
1	परिणामात्	परिमितत्वात्
2	समन्वयात्	सारूप्यत्वात्
3	शक्तितः प्रवृत्तेः	कारणशक्तेः कार्यस्य आविर्भवात्
4	कार्यकारणविभागाद्	कारणात् कार्यस्य भिन्नत्वात्
5	वैश्वरूपस्य अविभागाद्	नानारूपं कार्यं पुनः स्वकारणे विलीयन्ते इति हेतोः

भेदानां (महदादीनां) कारणम् अस्ति इति आगामिन्या कारिकया समन्वयः।

17

सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययात्। पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च।।

पुरुषः अस्ति		
1	सङ्घातपरार्थत्वात्	भूतादयः परेषां कृते एव सन्ति इति हेतोः
2	त्रिगुणादिविपर्ययात्	सत्त्व-रजस्-तमसादि-गुणवतां विभिन्नत्वात्
3	भोक्तृभावात्	भोग्यवस्तूनां कश्चन भोक्ता भवेत् इति हेतोः
4	कैवल्यार्थं प्रवृत्तेः	केवलत्वसिद्धये प्रवर्तते इति हेतोः

18

जन्ममरणकरणानां प्रतिनियमात् अयुगपत् प्रवृत्तेश्च। पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्च॥

	पुरुषबहुत्वम् सिद्धम्	
1	जन्ममरणकरणानां प्रतिनियमात्	प्रत्येकस्य पुरुषस्य जन्म पृथक् भवति। प्रत्येकस्य पुरुषस्य मरणं पृथक् भवति। प्रत्येकस्य पुरुषस्य करणानि पृथक् भवन्ति।
2	अयुगपत् प्रवृत्तेः	पूर्वोक्तजन्ममरणादीनां युगपत् प्रवृत्तिः न दृश्यते।
3	त्रैगुण्यविपर्ययात्	प्रत्येकस्मिन् पुरुषे सत्त्व-रजस्-तमोगुणाः समानतः न भवन्ति इति हेतोः।

19

तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य। कैवल्यं माध्यस्थ्यं द्रष्टृत्वम् अकर्तृभावश्च।।

त्रिगुणविपर्यासात् पुरुषस्वरूपम्

1	साक्षित्वम्	साक्षी
2	कैवल्यम्	केवलः
3	माध्यस्थ्यम्	मध्यस्थः
4	द्रष्टृत्वम्	द्रष्टा
5	अकर्तृभावः	अकर्ता

20

तस्मात् तत्संयोगात् अचेतनं चेतनावदिव लिङ्गम्।
गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः।।

तत्संयोगात् = प्रकृति-पुरुषसंयोगात्

लिङ्गम् (महदादि)	पुरुषः
अचेतनम् अपि चेतनावत् इव भाति।	उदासीनः अपि कर्ता इव भाति।
गुणम् = त्रिगुणाः	
गुणानां कार्यसृष्टेः गुणकर्तृत्वम्।	

पुरुषः

1	सङ्घातपरार्थः -	The Aggregates are meant for another
2	त्रिगुणादिविपर्ययः -	Different from Evolvents and Evolutes that possess three attributes etc.
3	भोक्ता -	One who experiences
4	कैवल्यार्थप्रवृत्तिः -	Possesses the tendency of being active for salvation
5	पुरुषबहुत्वम्	Not one, but Many
6	साक्षी	Witness
7	अकर्ता	Not a doer

21

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगः तत्कृतः सर्गः।।

उभयोः (प्रकृति-पुरुषयोः) संयोगः		
	प्रकृतेः पुरुषसंयोगापेक्षा	पुरुषस्य प्रकृतिसंयोगापेक्षा
किमर्थम्	दर्शनार्थम् (भोग्यार्थम्)	कैवल्यार्थम् (अपवर्गार्थम्)
कथम्	पङ्गु-अन्धवत्	
पर्यवसानम्	(तत्=संयोगः) संयोगकृतः सर्गः	

प्रधानम् = प्रकृतिः

प्रकृतिः पुरुषं दर्शनार्थम् अपेक्षते

प्रकृतिः

[redacted]

प्रकृतिः + पुरुषः

पुरुषः प्रकृतिं कैवल्यार्थम् अपेक्षते

पुरुषः	पुरुषः + प्रकृतिः

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि।।

प्रकृति-पुरुषसंयोगकृतः सर्गः

1	प्रकृतेः महान्	प्रकृतितः महत् (बुद्धिः)
2	ततोऽहङ्कारः	महत्-तः अहङ्कारः
3	तस्माद् गणश्च षोडशकः	अहङ्कारतः षोडशानां गणः मनः (1) पञ्च ज्ञानेन्द्रियाणि (2-6) पञ्च कर्मेन्द्रियाणि (7-11) पञ्च तन्मात्राणि (12-16)
4	तत्र षोडशके पञ्च	षोडशके गणे पञ्च तन्मात्राणि
5	षोडशकात् पञ्चभ्यः पञ्चभूतानि	पञ्च तन्मात्रेभ्यः क्रमशः पञ्च भूतानि

22

	प्रकृतिः	विकृतिः	
	मूलप्रकृतिः	महत् (बुद्धिः)	
	महत्	अहङ्कारः	
	अहङ्कारः	1	मनः
		2-6	पञ्च ज्ञानेन्द्रियाणि
		7-11	पञ्च कर्मेन्द्रियाणि
		12-16	पञ्च तन्मात्राणि
	पञ्च तन्मात्राणि	पञ्च भूतानि	

प्रकृतौ एव (न तु विकृतौ) यस्य नाम अस्ति तत् प्रधानम्।
प्रकृतौ विकृतौ च उभयत्र येषां नामानि सन्ति तानि प्रकृतिविकृतयः।
विकृतौ एव (न तु प्रकृतौ) येषां नामानि सन्ति तानि विकृतयः केवलम्।

22

सर्गः



23

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद् रूपं तामसमस्माद् विपर्यस्तम्।।

बुद्धिः (अध्यवसायः)

- सात्त्विकम्
- तामसम्

बुद्धिः (अध्यवसायः)		
सात्विकम्		तामसम्
धर्मः	1	अधर्मः
ज्ञानम्	2	अज्ञानम्
विरागः	3	रागः
ऐश्वर्यम्	4	अनैश्वर्यम्

23

सात्त्विका बुद्धिः

1	धर्मः	अभ्युदयनिःश्रेयसहेतुः। यमनियमाः।
2	ज्ञानम्	व्यक्त-अव्यक्त-ज्ञ-विज्ञानम्।
3	विरागः	यतमानः / व्यतिरेकः / एकेन्द्रियः / वशीकरणः
4	ऐश्वर्यम्	अणिमा महिमा चैव गरिमा लघिमा तथा। प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चाष्टसिद्धयः।।

एतद्-व्यतिरिक्ता तामसिका बुद्धिः।

24

अभिमानोऽहङ्कारः तस्माद् द्विविधः प्रवर्तते सर्गः।
एकादशकश्च गणः तन्मात्रपञ्चकश्चैव।।

अहङ्कारः (अभिमानः)							
एकादशकः गणः						तन्मात्रपञ्चकम्	
एकम् उभयेन्द्रियम्		पञ्च बुद्धीन्द्रियाणि		पञ्च कर्मेन्द्रियाणि			
1	मनः	2	श्रोत्रम्	7	वाक्	1	शब्दः
		3	त्वक्	8	पाणी	2	स्पर्शः
		4	चक्षुः	9	पादौ	3	रूपम्
		5	रसनम्	10	पायुः	4	रसः
		6	घ्राणम्	11	उपस्थः	5	गन्धः

सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्। भूतादेस्तन्मात्रः स तामसः तैजसादुभयम्।

अहङ्कारः (अभिमानः)							
वैकृतः+तैजसः एकादशकः गणः (सात्त्विकः+राजसः)						भूतादिः+तैजसः तन्मात्रपञ्चकम् (तामसम्+राजसम्)	
एकम् उभयेन्द्रियम्		पञ्च बुद्धीन्द्रियाणि		पञ्च कर्मेन्द्रियाणि			
1	मनः	2	श्रोत्रम्	7	वाक्	1	शब्दः
		3	त्वक्	8	पाणी	2	स्पर्शः
		4	चक्षुः	9	पादौ	3	रूपम्
		5	रसनम्	10	पायुः	4	रसः
		6	घ्राणम्	11	उपस्थः	5	गन्धः

अहङ्कारः त्रिविधः



बुद्धीन्द्रियाणि चक्षुः श्रोत्र-घ्राण-रसन-त्वगाख्यानि।
वाक्-पाणि-पाद-पायु-उपस्थान् कर्मेन्द्रियाण्याहुः।।

पञ्च बुद्धीन्द्रियाणि

1	चक्षुः
2	श्रोत्रम्
3	घ्राणम्
4	रसनम्
5	त्वक्

पञ्च कर्मेन्द्रियाणि

1	वाक्
2	पाणी
3	पादौ
4	पायुः
5	उपस्थः

27

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात्। गुणपरिणामविशेषात् नानात्वं बाह्यभेदाश्च।।

मनः		
1	उभयात्मकम्	बुद्धीन्द्रियम् + कर्मेन्द्रियम्
2	सङ्कल्पकम्	विवेचकम्
3	केन साधर्म्यम्	इन्द्रियैः साधर्म्यम्
4	कथं साधर्म्यम्	सात्त्विकाहङ्कारजन्यत्वात्
5	मनः नानाविधम्	अनेकम्
6	बाह्यभेदम्	एकैस्यैव वस्तुनः भेदाः इव भिन्नभिन्नम् (घटपटादिवत्)
7	कस्मात्	गुणानां सत्त्व-रजस्-तमसां परिणामत्वात्।

28

रूपादिषु पञ्चानाम् आलोचनामात्रमिष्यते वृत्तिः।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्।।

बुद्धीन्द्रियम्	रूपादिषु वृत्तिः	कर्मेन्द्रियम्	वृत्तिः
चक्षुः	रूपग्रहणम्	वाक्	वचने
श्रोत्रम्	शब्दग्रहणम्	पाणी	आदाने
घ्राणम्	गन्धग्रहणम्	पादौ	विहरणे
रसनम्	रसग्रहणम्	पायुः	उत्सर्गे
त्वक्	स्पर्शग्रहणम्	उपस्थः	आनन्दे

आलोचना = ग्रहणम्

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च।।

	अन्तःकरणवृत्तयः		
	महत् (बुद्धिः)	अहङ्कारः	मनः
असामान्या वृत्तिः	अध्यवसायः (निर्णयः)	अभिमानः	सङ्कल्पः
सामान्या वृत्तिः	प्राणाद्याः वायवः पञ्च (प्राणधारणम्)		

29

प्राणादिपञ्चवायुवृत्तयः

प्राणः	अपानः	समानः	उदानः	व्यानः
हृदयम्	कृकटिका	हृदयम्	हृदयम्	त्वक्
नासिकाग्रम्	पृष्ठम्	नाभिः	कण्ठः	
नाभिः	पादः	सर्वसन्धयः	तालु	
पादः	पायुः		मूर्द्धा	
अङ्गुष्ठः	उपस्थः		भ्रूमध्यम्	
	पार्श्वम्			

युगपत् चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा। दृष्टे तथाप्यदृष्टे त्रयस्य तत् पूर्विका वृत्तिः।।

चतुष्टयम्	= 1 बाह्येन्द्रियम् 2 महत् 3 अहङ्कारः 4 मनः
युगपत् वृत्तिः	= एकस्मिन् एव काले व्यापरः
क्रमशः वृत्तिः	= एकस्यानन्तरं अन्यस्य व्यापारः
दृष्टे	= प्रत्यक्षे
अदृष्टे	= अप्रत्यक्षे
तत्पूर्विका	= बुद्धीन्द्रियव्यापारपूर्विका

30

30

What is here?

In the light of a lightning

31

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम्।
पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्।।

करणम् = करणानां समूहः (त्रयोदशात्मकम्।)
1 महत् 2 अहङ्कारः 3 मनः 4-8 बुद्धीन्द्रियाणि 9-13 कर्मेन्द्रियाणि
करणानि स्वां स्वां वृत्तिं प्रतिपद्यन्ते।
कीदृशीं वृत्तिं प्रतिपद्यन्ते? – परस्पराकूतहेतुकां वृत्तिम्।
स्वस्ववृत्तिषु किमर्थं तेषां व्यापारः? – पुरुषार्थम्। (पुरुषस्य भोगापवर्गार्थम्)
न केनचित् करणम् कार्यते = ईश्वरेण वा पुरुषेण वा न कार्यते। (न प्रेर्यते।)

32

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्।
कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च।।

करणम्				
महत् (बुद्धिः)	अहङ्कारः	मनः	5 बुद्धीन्द्रियाणि	5 कर्मेन्द्रियाणि
1 आहरणकरम् 2 धारणकरम् 3 प्रकाशकरम्				

करणकार्यम्
1 दशधा आहार्यम् 2 दशधा धार्यम् 3 दशधा प्रकाश्यम्

32

दशधा करणकार्यम्					
अन्तःकरणम्		बुद्धीन्द्रियाणि		कर्मेन्द्रियाणि	
दशविधं धार्यम्		दशविधं प्रकाश्यम्		दशविधम् आहार्यम्	
दिव्यम्	अदिव्यम्	दिव्यम्	अदिव्यम्	दिव्यम्	अदिव्यम्
प्राणः	प्राणः	रूपम्	रूपम्	वचनम्	वचनम्
अपानः	अपानः	शब्दः	शब्दः	आदानम्	आदानम्
समानः	समानः	गन्धः	गन्धः	गमनम्	गमनम्
उदानः	उदानः	रसः	रसः	उत्सर्गः	उत्सर्गः
व्याऩः	व्याऩः	स्पर्शः	स्पर्शः	आनन्दः	आनन्दः

अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।
साम्प्रतकालं बाह्यम् त्रिकालमाभ्यन्तरं करणम्।।

करणम्				
अन्तःकरणम् (आभ्यन्तरकरणम्)			बाह्यकरणम्	
बुद्धिः	अहङ्कारः	मनः	5 बुद्धीन्द्रियाणि	5 कर्मेन्द्रियाणि
त्रिकालम्	त्रिकालम्	त्रिकालम्	साम्प्रतकालम्	साम्प्रतकालम्
अन्तःकरणस्य विषयसमर्पकं बाह्यकरणम्। (अन्तःकरणस्य सहकारि)				

34

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि।
वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि।।

बुद्धीन्द्रियाणि				
चक्षुः	श्रोत्रम्	घ्राणम्	रसनम्	त्वक्
रूपम्	शब्दः	गन्धः	रसः	स्पर्शः
कर्मेन्द्रियाणि				
वाक्	पाणिः	पादः	पायुः	उपस्थः
शब्दविषया	पञ्चविषयः	पञ्चविषयः	पञ्चविषयः	पञ्चविषयः

35

सान्तःकरणा बुद्धिः सर्वविषयमवगाहते यस्मात्।
तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि।।

यस्मात्	सान्तःकरणा बुद्धिः	सर्वविषयान् अवगाहते	तस्मात्	द्वारि
यस्मात्	बाह्येन्द्रियाणि	सर्वविषयान् समर्पयन्ति	तस्मात्	द्वाराणि

36

एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति।।

एते	**= अन्तःकरणानि + बाह्यकरणानि**
प्रदीपकल्पाः	= दीपेन समानानि
परस्परविलक्षणाः	= परस्परविरुद्धलक्षणानि
गुणविशेषाः	= त्रिगुणविकाराणि
कृत्स्नं	= सम्पूर्णतया
पुरुषस्य	= पुरुषस्य कृते
अर्थं प्रकाश्य	= विषयजातं प्रकाश्य
बुद्धौ	= विवेचनार्थम् (निर्णयार्थम्)
प्रयच्छन्ति	= समर्पयन्ति

सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः।
सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरम्।।

बुद्धिः = महत्
यस्मात्
पुरुषस्य (कृते)
सर्वं प्रत्युपभोगं साधयति
पुनः
सा एव
प्रधानपुरुषान्तरम्
विशनिष्टि
तस्मात् (सा बुद्धिः महत् भवति।)

- पुरुषस्य भोगापवर्गाणां बुद्धिः एव हेतुः।

38

तन्मात्राण्यविशेषाः तेभ्यो भूतानि पञ्च पञ्चभ्यः।
एते स्मृता विशेषाः शान्ता घोराश्च मूढाः।।

तन्मात्राणि अविशेषाः
अविशेषाः = विशेषरहिताः
तेभ्यः पञ्चभ्यः = तन्मत्रेभ्यः
पञ्च भूतानि = पृथिव्यप्तेजोवाय्वाकाशाः
एते = पञ्च भूतानि
विशेषाः स्मृताः = स्थूलाः इति स्मृताः
पञ्चभूतानि विशेषाः
एते विशेषाः -- शान्ताः घोराः मूढाः च

अविशेषेभ्यः तन्मात्रेभ्यः	→	विशेषाः भूतानि
शब्दतः	→	आकाशः
स्पर्शतः	→	वायुः
रूपतः	→	तेजः
रसतः	→	आपः
गन्धतः	→	पृथिवी

अविशेषाः	विशेषाः	विशेषगुणाः
शब्दः	आकाशः	उदात्तः अनुदात्तः स्वरितः इत्यादयः
स्पर्शः	वायुः	मृदु-कठिनत्वादीनि, शब्दः च
रूपम्	तेजः	शुक्लत्वादीनि, शब्दः, स्पर्शः च
रसः	आपः	मधुरत्वादीनि, शब्दः, स्पर्शः, रूपं च
गन्धः	पृथिवी	सुरभित्वादीनि, शब्दः, स्पर्शः, रूपं, रसः च

पञ्च भूताः	
शान्ताः	सत्त्वोद्रिक्ताः सुखकारकाः
घोराः	रजसोद्रिक्ताः दुःखदायकाः
मूढाः	तमसोद्रिक्ताः मोहदायकाः

सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः।
सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते।।

त्रिधा विशेषाः		
सूक्ष्माः (सूक्ष्मशरीराणि)	मातापितृजाः (स्थूलशरीराणि)	प्रभूताः (पञ्च भूतानि)
नियताः	निवर्तन्ते	आकाशः
		वायुः
		तेजः
		आपः
		पृथिवी
व्यक्ताव्यक्तज्ञविज्ञानपर्यन्ताः	जननमरणयुक्ताः	प्रलयपर्यन्ताः

40

पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्।।

लिङ्गम् = सूक्ष्मशरीरम्	
पूर्वोत्पन्नम्	पूर्वम् एव (प्रधानात्) उत्पन्नम्।
असक्तम्	न केनचित् सक्तम्। अर्थात् अनिरुद्धम्। अप्रतिहतगति।
नियतम्	नित्यम् (ज्ञानपर्यन्तम्)। प्रत्येकस्य स्थूलशरीरस्य एतन्नियतम्।
महदादिसूक्ष्मपर्यन्तम्	महदि, अहङ्कारे, एकादशेन्द्रियगणे, पञ्चतन्मात्रेषु च वर्तते।
संसरति	एकं स्थूलशरीरं विहाय अन्यत् शरीरम् अभिगच्छति।
निरुपभोगम्	स्थूलशरीरराहित्यात् स्वतः उपभोगः अस्य न भवति।
भावैः अधिवासितम्	धर्माधर्माभ्यां ज्ञानाज्ञानाभ्यां विरागरागाभ्याम् ऐश्वर्यानैश्वर्याभ्यां च अधिवसति। (सात्त्विक-तामसिकबुद्धिगुणैः अधिवसति।)

41

चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया।
तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्।।

एतेन विना	एतत् निराश्रयम्
आश्रयेण (भित्तिपटादिभिः) विना	चित्रं निराश्रयम्
स्थाण्वादिभिः विना	छाया निराश्रया
विशेषैः (पञ्चभूतैः) विना	लिङ्गम् (सूक्ष्मशरीरम्) निराश्रयम्

चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया।
तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्।।

पटम् चित्रस्य आश्रयम्

स्थाणुः छायायाः आश्रयः

विशेषाः लिङ्गस्य आश्रयाः

42

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन। प्रकृतेर्विभुत्वयोगात् नटवत् व्यवतिष्ठते लिङ्गम्।।

लिङ्गं नटवत् व्यवतिष्ठते। (किमर्थम्?)	
पुरुषार्थहेतुकम्	पुरुषस्य अर्थहेतुकम्। पुरुषस्य भोगापवर्गसाधनप्रयोजकम्।
निमित्तप्रसङ्गेन	निमित्तानां धर्माधर्म-ज्ञानाज्ञान-विरागराग-ऐश्वर्यानैश्वर्याणां सम्बन्धेन
नैमित्तिकप्रसङ्गेन	नैमित्तिकस्य स्थूलशरीरस्य सम्बन्धेन
प्रकृतेः विभुत्वयोगात्	प्रकृतेः नानारूपधारणशक्तेः साहाय्येन

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च धर्माद्याः।
दृष्टाः करणाश्रयिणः कार्याश्रयिणः कललाद्याः।।

धर्माद्याः भावाः करणाश्रयिणः	
सांसिद्धिकाः	असांसिद्धिकाः
प्राकृतिकाः	वैकृताः
करणाश्रयिणः	करणाश्रयिणः
धर्माधर्मौ	धर्माधर्मौ
ज्ञानाज्ञाने	ज्ञानाज्ञाने
विरागरागौ	विरागरागौ
ऐश्वर्यानैश्वर्ये	ऐश्वर्यानैश्वर्ये

करणम् = बुद्धिः

कार्याश्रयिणः कललाद्याः	
शुक्रशोणितसंयोगात् भवन्ति।	
गर्भे	गर्भात् बहिः
कललः	शैशवम्
बुद्बुदः	कौमारम्
मांसपिण्डम्...	यौवनम्
	वार्धक्यम्

कार्यम् = शरीरम्

धर्मेण गमनमूर्ध्वं गमनमधस्तात् भवत्यधर्मेण।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः।।

धर्मेण	अधर्मेण
ऊर्ध्वगमनम्	अधोगमनम्
(स्वर्गादिप्राप्तिः)	(नरकादिप्राप्तिः)
(उत्तरजन्मप्राप्तिः)	(नीचजन्मप्राप्तिः)

ज्ञानेन	अज्ञानेन
अपवर्गः	बन्धः
कैवल्यम्	प्राकृतिकबन्धः (प्रकृतिपुरुषयोरेकत्व भावना) वैकृतिकबन्धः (मनोबुद्ध्यहङ्काराः एव पुरुष इति भावना) दाक्षिणबन्धः (इष्टापूर्तादिभिः बन्धः)

45

वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद्रागात्। ऐश्वर्यादविघातो विपर्ययात् तद्विपर्यासः।।

वैराग्यात्	**राजसाद् रागात्**
प्रकृतिलयः	संसारः
बुद्धौ अहङ्कारे च लयः	जननमरणश्रेणिरूपः

ऐश्वर्यात्	**अनैश्वर्यात्**
अविघातः	विघातः
इच्छायाः अविघातः	इच्छायाः विघातः
गमनस्य अविघातः	गमनस्य विघातः

46

एष प्रत्ययसर्गो विपर्ययाऽशक्ति-तुष्टि-सिद्ध्याख्याः।
गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत्।।

प्रत्ययः = प्रतीयते अनेन इति प्रत्ययः (बुद्धिः)
सर्गः = सृष्टिः
अष्टधा प्रत्ययसर्गः 1 धर्मसर्गः 2 अधर्मसर्गः 3 ज्ञानसर्गः 4 अज्ञानसर्गः 5 विरागसर्गः 6 रागसर्गः 7 ऐश्वर्यसर्गः 8 अनैश्वर्यसर्गः

प्रत्ययसर्गः पुनः चतुर्विधः।			
विपर्ययः	अशक्तिः	तुष्टिः	सिद्धिः
उपर्युक्तसर्गे 50 भेदाः सन्ति।			
कस्मात्?			
1 गुणवैषम्यात्		2 गुणविमर्दात्	

47

पञ्चविपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात्।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः।।

विपर्ययाः 5 अज्ञानप्रभवाः	अशक्तिः 28 करणवैकल्यप्रभवाः
अविद्या (तमः)	28 भेदाः
अस्मिता (मोहः)	
रागः (महामोहः)	
द्वेषः (तामिस्रः)	
अभिनिवेशः (अन्धतामिस्रः)	

तुष्टिः 9 राजसज्ञानसम्भवः	सिद्धिः 8
नवधा	अष्टधा

5+28+9+8 = 50

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः।
तामिस्रोऽष्टादशधा तथा भवन्त्यन्धतामिस्रः।।

तमः	मोहः	महामोहः (रागात्मकः)		तामिस्रः (द्वेषात्मकः)	अन्धतामिस्रः (भयात्मकः)
8 विधः	8 विधः	10 विधः		18 विधः	18 विधः
1 प्रकृतौ 2 महति 3 अहङ्कारे 4-8 पञ्चतन्मात्रेषु आत्मख्यातिः	8 सिद्धयः शाश्वताः इति ख्यातिः	दिव्यम्	अदिव्यम्	5 दिव्याः शब्दादयः	5 दिव्याः शब्दादयः
		शब्दः	शब्दः		
		स्पर्शः	स्पर्शः	5 अदिव्याः शब्दादयः	5 अदिव्याः शब्दादयः
		रूपम्	रूपम्		
		रसः	रसः	8 सिद्धयः	8 सिद्धयः
		गन्धः	गन्धः		

एकादशेन्द्रियवधाः सहबुद्धिवधैरशक्तिरुद्दिष्टा। सप्तदशवधा बुद्धेर्विपर्ययात् तुष्टिसिद्धीनाम्।।

इन्द्रियवधः एकादशधा (11)
5 ज्ञानेन्द्रियवधः
5 कर्मेन्द्रियवधः
1 मनोवधः

बुद्धिवधः अष्टादशधा (17)
9 तुष्टीनां विपर्ययाः
8 सिद्धीनां विपर्ययात्

50

आध्यात्मिकश्चतस्रः प्रकृत्युपादानकालभागाख्याः।
बाह्या विषयोपरमात् पञ्च नव तुष्टयोऽभिमताः।।

नवतुष्टयः (9)

आध्यात्मिकतुष्टयः 4
प्रकृतितुष्टिः (प्रकृतिरेव ज्ञानं ददातीति)
उपादानतुष्टिः (संन्यासादेव ज्ञानं भवतीति)
कालतुष्टिः (काल एव ज्ञानं ददातीति)
भाग्यतुष्टिः (भाग्यादेव ज्ञानं भवतीति)

बाह्यविषयोपरमाः 5
शब्दोपरमः
स्पर्शोपरमः
रूपोपरमः
रसोपरमः
गन्धोपरमः

51

ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।
दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः।।

अष्टसिद्धयः (8)

दुःखविघाताः (3)
आध्यात्मिकदुःखविघातः
आधिभौतिकदुःखविघातः
आधिदैविकदुःखविघातः

इतरे (5)
अध्ययनम् (गुरोः सन्निधौ)
शब्दः (श्रवणम्)
ऊहः (युक्तिभिः संशयदूरीकरणम्)
सुहृत्प्राप्तिः
दानम् (निदिध्यासनेन परिशुद्धिः)